शण्डाते। ङ, शण्डते। काण्डो वीरं रुजतीत्यर्थः। इति दुर्गादासः॥

शण, म दाने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) म, शणयति। इति दुर्गादासः॥

शणं, क्ली, (शण+अच्।) क्षुपविशेषः। तत्पर्य्यायः। भङ्गा २ मातुलानी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १४५। ११।
"शणं तैलं घृतञ्चैव जतु दारूणि चैव हि।
तस्मिन् वेश्मनि सर्वाणि निःक्षिपेथाः समन्ततः॥")

शणः, पुं, (शण+पचाद्यच्।) स्वनामख्यातक्षुपः। तत्पर्य्यायः। माल्यपुष्पः २ वमनः ३ कटुतिक्तकः ४ निशावनः ५ दीर्घशाखः ६ त्वक्सारः ७ दीर्घपल्लवः ८। अस्य गुणाः। अम्लत्वम्। कषायत्वम्। मलगर्भास्रपातनत्वम्। वातकारित्वम्। पित्तकफतीव्राङ्गमर्द्दनाशित्वञ्च। इति राजनिर्घण्टः॥

शणघण्टिका, स्त्री, (शणस्य घण्टेव तत्तुल्यशब्दकारिफलवत्त्वात्। इवार्थे कन्। टापि अत इत्वम्।) शणपुष्पी। इति राजनिर्घण्टः॥

शणपर्णी, स्त्री, (शणस्य पर्णमिव पर्णमस्याः। ङीप्।) अशनपर्णी। इति शब्दरत्नावली॥

शणपुष्पिका, स्त्री, (शणपुष्पी+स्वार्थे कन्। अत इत्वम्।) घण्टारवा। इत्यमरभरतौ॥ झनझनिया इति वनशोण इति च भाषा॥

शणपुष्पी, स्त्री, (शणस्य पुष्पमिव पुष्पमस्याः।) क्षुपविशेषः। शणहुली इति शणइ इति वनशणइ इति च भाषा। तत्पर्य्यायः। बृहत्पुष्पी २ शणिका ३ शणघण्टिका ४ पीतपुष्पी ५ स्थूलफला ६ लोमशा ७ माल्यपुष्पिका ८। अस्या गुणाः। क्षुद्रतिक्तत्वम्। वमिकारित्वम्। रसनियामकत्वञ्च। इति राजनिर्घण्टः॥

शणसूत्रं, क्ली, (शणस्य सूत्रम्।) पवित्रकम्। इत्यमरः॥ "हे शणसूत्रजाले। शणस्य सूत्रं शणसूत्रम्। शणति ददाति सूत्रं शणः। शण अस्म दाने अन्। शणः तालव्यशादिर्मूर्द्धन्यणान्तः इति बहवः। सनो दन्त्यसादिर्दन्त्यनान्त इति केचित्। तन्मते षन द ञु दाने इत्यस्य रूपम्। सणो दन्त्यसादिमूर्द्धन्यणान्त इत्यपरे। सणकिणमणिकाकणकोणकाणा इति मूर्द्धन्यणान्ते विद्याभरणम्॥
'कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत्।
सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥'
इति मनुवचनात् पवित्रकमपि तदुच्यते। आनाय इत्यादि चतुष्कं जाले इत्येके। आनाय इत्यादि श्लोकार्द्धं क्वचिद्दृश्यते तत् स्वाम्याद्युपेक्षितमपि अन्यैरादृतमिति विवृतम्।" इति तट्टीकायां भरतः॥

शणालुकः, पुं, (शणालुरेव। स्वार्थे कन्।) आरेवतवृक्षः। इति शब्दरत्नावली॥ शोणालु इति भाषा॥

शणिका, स्त्री, (शण+स्त्रियां टाप्। कन्। अत इत्वम्।) शणपुष्पी। इति राजनिर्घण्टः॥

शणीरं, क्ली, शोनमध्यस्थपुलिनम्। दर्द्दरीतटम्। इति मेदिनी॥

शण्डं क्ली, पद्मादिसमूहः। इति शब्दरत्नावली॥

शण्डः, पुं, नपुंसकम्। गोपतिः। इति भरतद्विरूपकोषः॥

शण्डता, स्त्री, (शण्डस्य भावः। तल्।) षण्डत्वम्। शण्डशब्दात् भावे तप्रत्ययस्यानन्तरं आप् प्रत्ययेन निष्पन्नमेतत्॥

शण्डिलः, पुं, (शडि रुजायाम्+"सलिकल्यनिमहिभडिभण्डिशण्डीति।" उणा० १।५५। इति इलच्।) मुनिविशेषः। इति सिद्धान्तकौमुदी॥

शण्ढः, पुं, (शाम्यति ग्राम्यधर्म्मात्। शम+"शमेर्ढः" उणा० १।१३१। इति ढः।) अन्तर्महल्लिकः। अभ्यन्तरस्त्रीरक्षकोऽयम्। खोजा इति भाषा। तत्पर्य्यायः। वर्षवरः २। तल्लक्षणम् यथा,—
"ये त्वल्पसत्त्वाः प्रथमाः क्लीवाश्च स्त्रीस्वभाविनः।
जात्या न दुष्टाः कार्य्येषु ते वै वर्षवराः स्मृताः॥" इति॥
नपुंसकम्। हिज्ड़े इति भाषा। इत्यमरभरतौ॥ गोपतिः। शाँड़ इति भाषा। इति मेदिनी॥ बन्ध्यपुरुषः। इति जटाधरः॥ उन्मत्तः। इति धनञ्जयः॥

शतं, क्ली, (दश दशतः परिमाणमस्येति। "पंक्तिविंशतित्रिंशदिति।" ५। १। ५९। इति तः दशानां शभावश्च निपात्यते।) दशगुणितदशसङ्ख्या। एकशओ इति हिन्दीभाषा। (यथा, शान्तिशतके।
"निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपः॥")
तत्पर्य्यायः। दशतिः २। इति पुराणम्॥ तद्वाचकानि। धार्त्तराष्ट्राः १ शतभिषातारा २ पुरुषायुषः ३ रावणाङ्गुलिः ४ पद्मदलम् ५ इन्द्रयज्ञः ६ अब्धियोजनम् ७। इति कविकल्पलता॥ (बहु। इति निघण्टुः। ३। १॥ यथा, ऋग्वेदे। ८।१।५। "वज्रिवो न शताय शतामघ।" "शताय बहुनामैतत् अपरिमिताय।" इति तद्भाष्ये सायनः॥)

शतकः, त्रि, (शतं परिमाणमस्य। शत+"संख्याया अतिशदन्तायाः कन्।" ५।१।२२॥ इति कन्।) शतसंख्याविशिष्टः। यथा। शान्तिशतकामरुशतकादिः। शतशब्दात् कप्रत्ययेन निष्पन्नमेतत्। (यथा, मार्कण्डेये। ४६।३०।
"सख्यासख्यांशकश्चैव शतकौ समुदाहृतौ॥")
स्वार्थे के शतकञ्च॥

शतकीर्त्तिः, पुं, भाव्यर्हद्विशेषः। इति हेमचन्द्रः॥

शतकुन्दः, पुं, (शतं कुन्दा यस्य।) करवीरः। इति राजनिर्घण्टः॥

शतकुम्भः, पुं, पर्व्वतविशेषः। इति शातकुम्भशब्दटीकायां भरतः॥ (स्त्री, नदीतीर्थविशेषः। यथा, महाभारते। ३। ८४। १०।
"सुगन्धां शतकुम्भाञ्च पञ्चयज्ञाञ्च भारत।
अभिगम्य नरश्रेष्ठ स्वर्गलोके महीयते॥")

शतकोटिः, पुं, (शतं कोटयोऽग्राः शिखा यस्य।) वज्रम्। इत्यमरः॥ इन्दसंख्या लीलावतीमते अब्जसंख्या॥

शतक्रतुः, पुं, (शतं क्रतवो यस्य।) इन्द्रः। इति धनञ्जयकोषः॥ (यथा, महाभारते। ३।४२।१२।
"आह माममरश्रेष्ठः पिता तव शतक्रतुः॥"
बहुकर्म्मा। बहुप्रज्ञः। यथा, ऋग्वेदे। १।१०।१।
"ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥"
"हे शतक्रतो बहुकर्म्मन् बहुप्रज्ञ वा।" इति तद्भाष्ये सायणः॥)

शतखण्डं, क्ली, सुवर्णम्। यथा,—
"सौमेरुकं महाधातुः शतखण्डं मृदुत्वकम्॥"
इति शब्दचन्द्रिका॥
शतभागश्च॥

शतग्रन्थिः, स्त्री, (शतं ग्रन्थयो यस्याः।) दूर्वा। इति राजनिर्घण्टः॥

शतघ्नी, स्त्री, (शतं हन्तीति। हन+टक्। ङीप्।) शस्त्रभेदः। अस्य लक्षणम्। यथा,—
"अयःकण्टकसंछन्ना शतघ्नी महती शिला।"
इति विजयरक्षितः॥
"दुर्गञ्च परिखोपेतं चयाट्टालकसंयुतम्।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम्॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम्।
सपताकं गजारूढो येन राजा विशेत् पुरम्॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १९१ अध्यायः॥*॥ (यथा, रघुः। १२। ९५।
"अयःशङ्कुचितां रक्षः शतघ्नीमथ शत्रवे।
हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्॥"
"अथ रक्षो रावणः अयसः शङ्कुभिः कीलैश्चितां कीर्णां शतघ्नीं लोहकण्टककीलितयष्टिविशेषाम्। शतघ्नी तु चतुस्ताला लोहकण्टकसञ्चिता। यष्टिः————॥ इति केशवः॥" इति तट्टीकायां मल्लिनाथः॥) वृश्चिकाली। करञ्जकः। इति मेदिनी॥ गलरोगविशेषः। अस्य निदानलक्षणचिकित्सा रोहिणीशब्दे द्रष्टव्याः॥

शतच्छदः, पुं, (शतं छदा यस्य।) काष्ठकुट्टपक्षी इति त्रिकाण्डशेषः॥ काठोकरा इति भाषा। शतदलपद्मञ्च॥

शततमः, त्रि, शतस्य पूरणः। शतशब्दात्तमट्प्रत्ययेन निष्पन्नमेतत्॥

शततारा, स्त्री, (शतं तारा यस्याम्।) शतभिषानक्षत्रम्। इति केचित्॥

शतदन्तिका, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

शतद्रुः, स्त्री, (शतधा द्रवतीति। शत+द्रु। 'शतेच' उणा० १। ३६। इति कुः।) नदीविशेषः। शतलज् इति हिन्दी भाषा। सा हिमालया-